**प्रश्न–पत्राणाम् अङ्कविभाजनपत्रम् (ब्लू–प्रिंट)**
**उच्चमाध्यमिकछात्राणां कृते**

कक्षा – दशमी (**X**) पूङ्काः – 100
विषय – संस्कृतम् (सामान्यम्) समयः – घण्टात्रयम्

| स. क्र. | इकाई | इकाई अनुसारेण आवंटिताङ्काः | अङ्कानुसारं प्रश्नानां सङ्ख्या | | | | | पूर्ण प्रश्नाः |
|---|---|---|---|---|---|---|---|---|
| | | | 01 अंक | 04 अंक | 05 अंक | 06 अंक | 10 अंक | |
| 01 | सन्धिः | 04 | 04 | | | | | 04 |
| 02 | समासः | 03 | 03 | | | | | 03 |
| 03 | धातुरूपाणि | 04 | 04 | | | | | 04 |
| 04 | उपसर्गः | 02 | 02 | | | | | 02 |
| 05 | सूक्तिः | 02 | 02 | | | | | 02 |
| 06 | प्रत्ययः | 04 | 04 | | | | | 04 |
| 07 | अव्ययम् | 02 | 02 | | | | | 02 |
| 08 | युग्म–मेलनम् | 04 | | 01 | | | | 01 |
| 09 | शुद्धाशुद्धौ | 04 | 04 | | | | | 04 |
| 10 | रिक्तस्थानपूर्तिः | 04 | | 01 | | | | 01 |
| 11 | एकपदेन प्रश्नोत्तराणि | 04 | | 01 | | | | 01 |
| 12 | एकवाक्येन प्रश्नोत्तराणि | 06 | | | | 01 | | 01 |
| 13 | शब्दरूपाणि | 04 | | 01 | | | | 01 |
| 14 | कारकप्रयोगः | 05 | | | 01 | | | 01 |
| 15 | सुभाषितम् | 04 | | 01 | | | | 01 |
| 16 | कथाक्रमसंयोजनम् | 05 | | | 01 | | | 01 |
| 17 | गद्यम् | 10 | | | 02 | | | 02 |
| 18 | पद्यम् | 10 | | | 02 | | | 02 |
| 19 | अपठितांशः | 05 | | | 01 | | | 01 |
| 20 | पत्रलेखनम् | 04 | | 01 | | | | 01 |
| 21 | निबन्धलेखनम् | 10 | | | | | 01 | 01 |
| | **पूर्णयोगः** | **100** | **25** | **06** | **07** | **01** | **01** | **40** |

निर्देशः – प्रश्नपत्रे प्रायः विंशतिः प्रश्नाः भविष्यन्ति। प्रश्नेषु उपप्रश्नाः अपि विधेयाः।
पञ्चविंशतिः अङ्कानाम् वस्तुनिष्ठप्रश्नाः अनिवार्याः भविष्यन्ति।

# प्रादर्श – प्रश्न – पत्रम्
## कक्षा –दशमी
## विषय – संस्कृतम् (सामान्यम्)

समयः – घण्टात्रयम् पूर्णाङ्काः –100

**निर्देश – सर्वेप्रश्नाः अनिवार्याः सन्ति ! प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।**

**उचित विकल्पं चित्वा लिखत –**

**प्रश्न1.(क)** ''राजर्षिः'' इत्यस्मिन् पदे सन्धिः अस्ति–

(अ) दीर्घसन्धिः (ब) यण्–सन्धिः (स) गुणसन्धिः (द) अयादिसन्धिः।

ख) ''निस्तारः इत्यस्मिन् पदे सन्धिः अस्ति

(अ) व्यञ्न सन्धि (ब) वृद्धिसन्धिः (स) विसर्गसन्धिः (द) अयादिसन्धिः।

ग) ''मातृ+अनुमतिः'' इत्यस्य सन्धिः अस्ति–

(अ)मात्रनुमतिः (ब) मात्रानुमतिः (स)मातृनुमतिः (द) मातृअनुमतिः।

घ)''सत्+शीलः'' इत्यस्य सन्धिः अस्ति

(अ)सत्यशीलः (ब) सच्शीलः (स)सच्छीलः (द) सत्छीलः ।

**प्रश्न2 (क)** ''अनश्वः इत्यस्मिन् पदे समासः अस्ति–

(अ) षष्ठीतत्पुरुषः (ब)तृतीयातत्पुरुषः (स)पञ्चमीतत्पुरुषः (द) नञ्–तत्पुरुषः

(ख) अव्ययीभाव समासस्य उदाहरणम् अस्ति–

(अ) सचक्रम (ब) महापुरुषः (स)असत्यम् (द) रोगमुक्तः।

(ग) ''चन्द्रशेखरः'' इत्यस्मिन् पदे समासः अस्ति–

(अ) द्वन्द्वसमासः (ब) कर्मधारयसमासः (स)द्विगुसमासः (द) बहुब्रीहिसमासः ।

(घ) अधोलिखितेषु अव्ययम् अस्ति –

(अ) अस्ति (ब) शनैः (स)वर्तते (द) ग्रामः

(ङ) ''अद्य अधिकं शैत्यं वर्तते'' अस्मिन् वाक्ये अव्ययम् अस्ति–

(अ)शैत्यम् (ब) अधिकम् (स) अद्य (द)वर्तते।

**प्रश्न3 (क)**''परागतः'' इत्यस्मिन् पदे उपसर्गः अस्ति–

(अ) परि (ब) प्र (स) प्रति (द) परा

(ख) अधोलिखितेषु उपसर्गः नास्ति

(अ) प्रति (ब) अति (स) अपि (द) अस्ति।

**प्रश्न 4 (क)** पठतो नास्ति ................।

(अ)विद्वत्वम्   (ब) मूर्खत्वम्।

(ख) .................. किल मनुष्याणां देवतानां च दैवतम्।

(अ) माता   (ब) पिता

**प्रश्न 5(क)** ''द्रक्ष्यामः'' इत्यस्मिन् पदे लकारः अस्ति

(अ) लट्लकारः (ब) लोट्लकारः (स) लृटलकारः (द) लङ्.लकारः।

(ख ''गच्छानि'' इत्यस्मिन् पदे पुरूषः अस्ति–

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः (स) उत्तमपुरुषः।

(ग) ''हन्ति'' इत्यस्मिन् पदे वचनम् अस्ति–

(अ) एकवचनम् (ब)द्विवचनम् (स) बहुवचनम्

(घ) ''पक्ष्यति'' इत्यस्मिन् पदे धातु; अस्ति–

(अ) पक्ष् (ब) प्रच्छ् (स) पच् (द) पा ।

**प्रश्न 6 (क)** 'अजा' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(अ) आप् (ब) जाप् (स) ङ्गाप (द) टाप्

(ख) ''शतृ'' प्रत्ययस्योदाहरणम् अस्ति –

(अ) पठितव्यम् (ब) पठन् (स) पठितुम् (द) पठितवान्।

(ग) ''गुण+मतुप्'' इत्यस्य पदम् भविष्यति–

(अ) गुणवान् (ब) गुणवती (स) गुणी (द) गुणिन्

(घ) ''आदाय'' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) आय (ब) ल्यप् (स) त्रल् (द) शानच्

**प्रश्न 7 – युग्ममेलनं कुरुत–**

| | (अ) | (आ) |
|---|---|---|
| (क) | कालगणना | धान्यवृद्धयः |
| (ख) | कृषीबलैः | पृथिवीम् |
| (ग) | शिखिनः | खगोलशास्त्रम् |
| (घ) | गाम् | नृत्यन्ति |

**प्रश्न 8 – शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत–**

(क) संस्कृता वाणी पुरुषं समलङ्करोति।

(ख) कुले लोके च अनुजः श्रेष्ठः भवति।

(ग) मनः दूरङ्गमम् अस्ति।

(घ) प्लवङ्गमाः मृदङ्गनादं  कुर्वन्ति।

**प्रश्न 9 – प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरूत –**

(लीलाम्, वारिधरैः, साधकं, मध्याः, छत्रसालः)

(क) प्रक्रीडितो .....................सुरेन्द्रः ।

(ख) कार्यं प्रारभ्य .......................विरमन्ति ।

(ग) वृद्धोऽपि वारणपतिर्न जहाति ....................।

(घ) भारतमातृभू:संरक्षकः ..................आसीत्।

(ङ.) भारतीयैकता ......................संस्कृतम्।

**प्रश्न10 – अधोलिखितप्रश्नानाम् उत्तराणि एकपदेन लिखत –**

(क) वैयाकरणेषु पूर्णः सर्वमान्यश्च कः ?

(ख) भगीरथः भूमितः नदीं कुत्र नीतवान्?

(ग) दरिद्रता कया विराजते ?

(घ) वरतन्तुशिष्यः कः आसीत् ?

**प्रश्न 11 अधोलिखितप्रश्नानाम् उत्तराणि एकवाक्येन लिखत –**

(क) विदिशानगरी कस्मिन् प्रदेशे स्थिता वर्तते ?

(ख) ब्राह्मण परिवारः केन समासादितः ?

(ग) कीदृशी वह्निः स्वयम् उपशाम्यति?

**प्रश्न12 – अधोलिखितगद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत –**

(क) कस्मिंश्चित् ग्रामे एकः प्राचीनः विशालःच न्यग्रोधवृक्षः आसीत्। सः पशुपक्षिभ्यः बहुविधेभ्यः जीवजन्तुभ्यः मनुष्येभ्यः अपि नित्यं बहूपकारकः आसीत्। पथिकाः तस्य वृक्षस्य छायायां पाथेयं भक्षयित्वा मार्गायासं परिहरन्ति स्म । पशवः छायार्थं वृक्षमिमम् आश्रयन्ति स्म ।

(क) ग्रामे कः वृक्षः आसीत् ?

(ख) वृक्षः केभ्यः वहूपकारकः आसीत्?

(ग) के छायार्थं वृक्षमिमम् आश्रयन्ति स्म?

(घ) वृक्षः कीदृशः आसीत्?

(स) मार्गायासं के परिहरन्ति स्म ?

**(ख)** अयं महापुरुषः चिरोपेक्षितवेदानां प्रचारमकरोत्। एतस्य विशिष्टः सन्देशः आसीत् यत्–जनाः वेदान् प्रत्यागच्छेयुः। ऋग्वेदादिभाष्यभूमिका–सत्यार्थप्रकाश–संस्कारविधिप्रभृतिग्रन्थाः एतेन विरचिताः। अक्टूबरमासे त्रिंशत् दिनाङ्के त्र्यशीत्युत्तराऽष्टादशशततमे (30.10.1883) ईश्वीये वर्षे एषः भौतिकं शरीरं विहाय यशःशरीरेणामरोऽभवत्।

(क) अयं केषां प्रचारमकरोत् ?

(ख) अस्य सन्देशः कः आसीत् ?

(ग) एतेन के के ग्रन्थाः विरचिताः ?

(घ) एषः केन अमरोऽभवत् ?

(ड.) एषः कदा शरीरम् अत्यजत्?

**प्रश्न 13 अधोलिखितपद्यांशौ पठित्वा प्रश्ननानामुत्तराणि लिखत –**

**(क)** विनाप्यर्थैर्वीरः स्पृशति बहुमानोन्नतिपदं
समायुक्तोप्यर्थैः परिभवपदं याति कृपणः।
स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां,
द्युतिं सैंहीं श्वा किं कनकमालोऽपि लभते ।।

(अ) वीरः कं पदं स्पृशति ?

(ब) कः परिभवपदं याति ?

(स) श्वा कस्याः द्युतिं न लभते ?

(द) श्वा कां धृत्वापि द्युतिं न लभते ?

(ड.) ''श्वा'' इत्यस्य शब्दस्य विभक्तिं वचनं च लिखत ।

**(ख)** घनोपगूढं गगनं न तारा
न भास्करो दर्शनमभ्युपैति।
नवैर्जलौघैर्धरणी वितृप्ता
तमोविलिप्ता न दिशः प्रकाशाः।

(अ) धरणी कैः वितृप्ता?

(ब) किं घनोपगूढम्?

(स) काः तमोविलिप्ताः ?

(स) कः दर्शनं न अभ्युपैति?

(इ) ''दिशः'' इत्यस्य शब्दस्य विभक्तिं वचनं च लिखत।

**प्रशन 14 –प्रश्न–पत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत।**

**प्रशन 15–अधोलिखितवाक्यानां कथानुसारेण क्रमसंयोजनं कुरूत–**

(क) सगरस्य वंशे भगीरथस्य जननम् अभवत्।

(ख) सः एकदा अश्वमेघयज्ञं कृतवान्।

(ग) सः स्वपूर्वजान् स्वर्गं नेतुं निश्चितवान्।

(घ) सूर्यवंशस्य राजा सगरः आसीत्।

(ङ.) यागस्य अन्ते यागस्य अश्वः यत्र तत्र सञ्चारं कृतवान्।

**प्रशन 16 अधोलिखितगद्यांशं सम्यक् पठित्वा प्रश्नानामुत्तराणि लिखत–**

अन्नजलादिकस्येव व्यायामस्य महती आवश्यकता वर्तते शरीरसंवर्धनाय। व्यायामेन शरीरस्थावयवाः पुष्टाः सञ्जायन्ते रक्तस्य सम्यक् सञ्चारो भवति, स्फूर्तिः प्राप्यते, रोगाः पलायन्ते, जीवनं च आह्लादमयं भवति। स्वस्थे शरीरे एव स्वस्थं मस्तिष्कं सम्भवति इति धारणा सर्वमान्या अस्ति ।

(क) उपर्युक्तगद्यांशस्य उचितशीर्षकं लिखत।

(ख) स्वस्थमस्तिष्कं कुत्र सम्भवति ?

(ग) स्फूर्तिः केन प्राप्यते?

(घ) व्यायामस्य आवश्यकता किमर्थं भवति ?

**प्रश्न 17 – अधोलिखितेषु द्वयोः शब्दरूपाणि त्रिषु वचनेषु लिखत –**

(क) साधु – चतुर्थीविभक्तिः ।

(ख) राजन् – प्रथमाविभक्तिः।

(ग) अस्मद् – पंञ्चमीविभक्तिः।

**प्रश्न 18 – अधोलिखितेषु पञ्च–अशुद्धवाक्यानां शुद्धिः करणीया –**

(क) ईश्वरं नमः ।

(ख) नृपस्य अभितः परिचारकाः सन्ति।

(ग) सीता रामस्य सह वनं गतवती।

(घ) पत्राः भूमौ निपतन्ति।

(ङ.) चतस्त्रः बालकाः उद्याने भ्रमन्ति।

(च) वयं रात्रौ पठिष्यन्ति।

**प्रश्न 19 – स्वस्य प्राचार्यस्य कृते छात्रवृत्यर्थं प्रार्थनापत्रं लिखत।**

अथवा

**स्वस्य वार्षिकपरीक्षापरिणामं सूचयितुं स्वमित्रं प्रति पत्रं लिखत।**

**प्रश्न 20 – अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृते निबन्धं लिखत –**

(क) अनुशासनम्।

(ख) मम दिनचर्या।

(ग) उत्सवः।

(घ) संस्कृतभाषायाः महत्त्वम्।

# प्रादर्श – उत्तर – पत्रम्
## कक्षा –दशमी
## विषय – संस्कृतम् (सामान्यम्)

समयः – घण्टात्रयम् पूर्णाङ्काः –100

---

उत्तर–1

(क) – (स) गुणसन्धिः
(ख) – (स) विसर्गसन्धिः
(ग) – (अ) मात्रनुमतिः
(घ) – (स) सच्छीलः

उत्तर–2

(क) – (द) नञ्–तत्पुरुसमासः
(ख) – (अ) सचक्रम्
(ग) – (द) बहुब्रीहिसमासः
(घ) – (ब) शनैः
(घ) – (स) अद्य

उत्तर–3

(क) – (द) परा
(ख) – (द) अस्ति

उत्तर–4

(क) – (ब) मूर्खत्वम्
(ख) – (अ) माता

उत्तर–5

(क) – (स) लृट्लकारः
(ख) – (स) उत्तमपुरुषः
(ग) – (अ) एकवचनम्
(घ) – (स) पच्

उत्तर–6

(क) – (द) टाप्
(ख) – (ब) पठन्
(ग) – (अ) गुणवान्
(घ) – (ब) ल्यप्

उत्तर–7

| | (अ) | (आ) |
|---|---|---|
| (क) | कालगणना | खगोलशास्त्रम् |
| (ख) | कृषीबलैः | धान्यवृद्धयः |
| (ग) | शिखिनः | नृत्यन्ति |
| (घ) | गाम् | पृथिवीम् |

उत्तर–8

(क) आम् ।

(ख) न ।

(ग) आम् ।

(घ) न ।

उत्तर–9

(क) वारिधरैः ।

(ख) मध्याः ।

(ग) लीलाम् ।

(घ) छत्रसालः ।

(ङ.) साधकं ।

उत्तर–10

(क) पाणिनिः ।

(ख) पाताले ।

(ग) धीरतया ।

(घ) कौत्सः ।

उत्तर–11

(क) विदिशानगरी मध्यप्रदेशे स्थिता वर्तते ।

(ख) ब्राह्मणपरिवारः घटोत्कचेन समासादितः ।

(ग) अतृणे पतितो वह्निः स्वयम् उपशाम्यति ।

उत्तर–12 (क)

(क) ग्रामे न्यग्रोधवृक्षः आसीत् ।

(ख) वृक्षः पशुपक्षिभ्यः बहुविधेभ्यः जीवजन्तुभ्यः मनुष्येभ्यः च बहूपकारकः आसीत् ।

(ग) पशवः छायार्थं वृक्षमिमम् आश्रयन्ति स्म।

(घ) वृक्षः प्राचीनः विशालः च आसीत् ।

(ङ) पथिकाः मार्गायासं परिहरन्ति स्म ।

उत्तर–12 (ख)
(क) अयं चिरोपेक्षितवेदानां प्रचारमकरोत् ।
(ख) अस्य सन्देशः आसीत् यत् – जनाः वेदान् प्रत्यागच्छेयुः ।
(ग) एतेन ऋग्वेदादिभाष्यभूमिका – सत्यार्थप्रकाश – संस्कारविधि – प्रभृतिग्रन्थाः विरचिताः।
(घ) एषः यशःशरीरेण अमरोऽभवत्।
(ङ) एषः अक्टूबरमासे त्रिंशत् दिनाङ्के त्रयशीत्युत्तराऽष्टादशशततमे (30/10/1883) ईशवीये वर्षे शरीरम् अत्यजत् ।

उत्तर–13 (क)
(क) वीरः बहुमानोन्नतिपदं स्पृशति।
(ख) कृपणः परिभवपदं याति।
(ग) श्वा सैंहीं द्युतिं न लभते।
(घ) श्वा कनकमालोऽपि धृत्वा द्युतिं न लभते।
(ङ) प्रथमाविभक्तिः, एकवचनम् ।

उत्तर–13 (ख)
(क) धरणी नवैर्जलौघैः वितृप्ता।
(ख) गगनं घनोपगूढम्।
(ग) दिशः तमोविलिप्ताः ।
(घ) भास्करः दर्शनं न अभ्युपैति।
(ङ) प्रथमाविभक्तिः, बहुवचनम् ।

उत्तर–14 प्रत्येक–शुद्ध–सुभाषितस्य कृते अङ्कद्वयं निर्धारितम् ।

उत्तर–15
(क) सूर्यवंशस्य राजा सगरः आसीत् ।
(ख) सः एकदा अश्वमेधयज्ञं कृतवान् ।
(ग) यागस्य अन्ते यागस्य अश्वः यत्र तत्र सञ्चारं कृतवान् ।
(घ) सगरस्य वंशे भगीरथस्य जननम् अभवत् ।
(ङ) सः स्वपूर्वजान् स्वर्गं नेतुं निश्चितवान् ।

उत्तर–16
(क) व्यायामः
(ख) स्वस्थमस्तिष्कं स्वस्थे शरीरे भवति।
(ग) स्फूर्तिः व्यायामेन प्राप्यते।
(घ) शरीरसंवर्धनाय व्यायामस्य आवश्यकता भवति।

उत्तर–17

(क) साधवे – साधुभ्याम् – साधुभ्यः

(ख) राजा – राजानौ – राजानः

(ग) मत् – आवाभ्याम् – अस्मत्

उत्तर–18

(क) ईश्वराय नमः ।

(ख) नृपम् अभितः परिचारकाः सन्ति।

(ग) सीता रामेण सह वनं गतवती।

(घ) पत्राणि भूमौ निपतन्ति।

(ङ) चत्वारः बालकाः उद्याने भ्रमन्ति।

(च) वयं रात्रौ पठिष्यामः ।

उत्तर–19 पत्रे सङ्केतं, सम्बोधनं दिनाङ्कादिकं दृष्टवा शुद्धपत्रस्य कृते चत्वारः अङ्काः प्रदानीयाः।

उत्तर–20 सम्पूर्ण–शुद्ध–निबन्धस्य कृते दश–अङ्काः निर्धारिताः।